# महाकविकालिदासविरचितस्य *अभिज्ञानशाकुन्तल*- नाटकस्य समीक्षणम्

महानन्दतिमिल्सिना *
विद्यावारिधिः

**सारः**

*प्रथमशतकसमुत्पन्नेन महाकविकालिदासेन विरचितमभिज्ञानशाकुन्तलनाटकं विश्वसाहित्येऽपि लब्धप्रतिष्ठं संलक्ष्यते । सप्तसङ्ख्यकेष्वङ्केषु विभाजितं नाटकमिदं सरसं हृदयाह्लादकं चानुभूयते । विविधनाट्यतत्त्वैः समलङ्कृतेऽस्मिन् नाटके कथावस्तूनां समुचितं संयोजनं संलक्ष्यते । अस्मिन् लेखे महाकविकालिदासस्याभिज्ञानशाकुन्तलनाटके कीदृशानां कथावस्तूनां प्रयोगः, चरित्रचित्रणं कीदृशमस्ति, नाट्यकाव्यपरम्परायामभिज्ञानशाकुन्तलस्यावदानं कीदृशमस्तीति तथ्यमत्र समीक्षितमस्ति । अत्र 'उपमा कालिदासस्य', 'काव्येषु नाटकं रम्यम्' इत्यादिकालिदाससम्बद्धानां सूक्तीनां प्रयोगसन्दर्भस्य समीक्षणमपि विहितमस्ति। अभिज्ञानशाकुन्तलनाटके रसध्वनिगुणरीत्यादीनां प्रयोगस्थितिविषयेऽपि विवेचनं कृतमस्ति । कविकालिदासेनाभिज्ञानशाकुन्तले प्रयुक्तस्य समाजस्य चित्रणमप्यत्र लेखे सङ्केतिमस्ति । स्वाभाविकरूपेण विषयवस्तूनां प्रतिपादने सरलसरसभाषासंयोजने च कविकालिदासः कुशलः संलक्ष्यते । 'काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला । तत्रापि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम् ॥' इति कालिदाससम्बद्धा प्रसिद्धिः संस्कृतविद्वत्सु प्रसिद्धा वर्तते । कथं नाटकमिदं रमणीयं जातमित्यस्मिन् विषयेऽप्यनुसन्धानं कृतमस्ति । अत्र प्रयुक्ता सन्दर्भा नाटकानुकूलाः, भाषानुकूलाः, चरित्रानुकूलाः, विषयानुकूलाश्च दृश्यन्ते । अत्र सम्भोगशृङ्गारस्य विप्रलम्भशृङ्गारस्य च सफलः प्रयोगोऽवाप्यते । एते विषयाः काव्यस्य सौन्दर्यपक्षं भावपक्षं च परिपोषयितुं कुशला विलोक्यन्ते । नाटकमिदं कथावस्तु-चरित्र-रस-ध्वनि-भाषाशैलीमाध्यमेन सहृदयान् आह्लादयितुं सामर्थ्ययुतं समवलोक्यते ।*

**शब्दकुञ्जिका -** रसः, ध्वनिः, उपमा, प्रकृतिः, सम्भोगशृङ्गारः ।

## १.विषयपरिचयः

अभिज्ञानशाकुन्तलम् इति नाटकं महाकविकालिदासेन विरचितं बहुप्रसिद्धं नाटकमस्ति । सप्तसङ्ख्यकेष्वङ्केषु विरचतेऽस्मिन् नाटके महाभारतस्यादिपर्ववर्णितस्य शकुन्तलोपाख्यानसम्बद्धस्य कथावस्तुनः संयोजनं कृतमस्ति । इयं प्रसिद्धा कथा भागवते, विष्णुपुराणे, हरिवंशे, पद्मपुराणे च प्राप्यते । अत्र चतुर्विंशतिसङ्ख्यकानां छन्दसां प्रयोगोऽवाप्यते, तत्रापि आर्याछन्दसः, वसन्ततिलकाछन्दसश्च प्रयोगाधिक्यं दृश्यते । नाटकस्यास्य नायको दुष्यन्तः, नायिका च शकुन्तला । यदा दुष्यन्तः शकुन्तलां गान्धर्वविधिना विवाहं कृतवान् तदा सः स्मृतिचिह्नरूपम् अङ्गुलीयकं दत्तवान्, परं दुर्वासाशापेन तदभिज्ञानं विलुप्तमभवत्, शापवशात् दुष्यन्तः स्वपत्नीं शकुन्तलां विस्मृतवान् । तदनु दुष्यन्तेन तिरस्कृता गर्भिणी शकुन्तला वनाश्रमे वसन्ती भरतनामकं पुत्रमजनयत्

* *उपप्राध्यापकः ने.सं.वि.पिण्डेश्वरविद्यापीठम् धरानः ।*

। अनन्तरं केनचिद् धीवरेण तदङ्गुलीयकं दुष्यन्तः लब्धवान् । ततः सः सम्पूर्णं पूर्ववृत्तान्तं स्मृतवान् । विरहव्याकुलः सः शकुन्तलामन्वेष्टुं वने परिभ्रमन् तत्राश्रमे गतवान् । तत्र भरतशकुन्तलाभ्यां सह राज्ञो मिलनमभवत् । अनेन प्रकारेण संयोगान्ते नाटकस्य समापनं जायते ।

नाटकमिदं विश्वसाहित्येऽपि प्रसिद्धम् । अस्य नाटकस्य विषये समीक्षकाः कथयन्ति -

काव्येषु नाटकं रम्यं तत्र रम्यं शकुन्तला ।
तत्रापि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम् ॥

अभिज्ञायते अनेन इति अभिज्ञानम् (अभिज्ञाल्युट्) चिह्नमिति, शकुन्तैः लालिता शकुन्तला, अभिज्ञानप्रधानं शकुन्तलामधिकृत्य रचितं नाटकम् अभिज्ञानशाकुन्तलनाटकम् इति व्युत्पत्त्याऽस्य नाटकस्य नामकरणं कृतमस्ति । 'कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम्' इति प्रसिद्धिरपि वर्तते । नाटकस्यास्य चतुर्थेऽङ्के प्रकृतिमानवयोः विलक्षणः समन्वयोऽस्ति । पाश्चात्यः समीक्षको गेटे शाकुन्तलस्य वैशिष्ट्यं प्रतिपादयन् कथयति - 'ऐश्वर्यं यदि वाञ्छसि प्रियसखे, शाकुन्तलं सेव्यताम् ।' कालिदासस्याभिज्ञानशाकुन्तलस्य तुलना पाश्चात्यकवेः शेक्सपियरमहाभागस्य टेम्पेस्ट इति सुखान्तनाटकेन सह विधीयते । अभिज्ञानशाकुन्तलं नाटकम् आङ्ल-जर्मनादिविविधासु भाषासु अनुवादो कृतोऽस्ति । कथावस्तुचयन-प्रकृतिचित्रण-सूक्तिप्रयोग-रसविन्यासादिदृष्ट्या नाटकमिदं सफलं विलक्षणं चास्ति ।

## २. समस्याकथनम्

अभिज्ञानशाकुन्तलनाटकस्य समीक्षणक्रमेऽस्मिन् लेखे निम्नाङ्किताः समस्याः समागताः सन्ति-

क. अभिज्ञानशाकुन्तलनाटके कीदृशं कथावस्तु प्रयुक्तमस्ति ?
ख. अभिज्ञानशाकुन्तलनाटके चरित्रसंयोजनं कीदृशम् ?
ग. अभिज्ञानशाकुन्तलनाटके रसध्वन्यादिप्रयोगस्य समाजप्रकृत्यादितत्त्वस्य च संयोजनं कीदृशम् ?

## ३. उद्देश्यम्

अध्ययनमेतत् निम्नाङ्कितेषूद्देश्येषु केन्द्रितमस्ति -

क. अभिज्ञानशाकुन्तलनाटके प्रयुक्तानां कथावस्तूनामध्ययनम्,
ख. अभिज्ञानशाकुन्तलानाटके समागतानां प्रमुखचरित्राणां चित्रणम्,
ग. अभिज्ञानशाकुन्तलनाटके रसध्वन्यादिप्रयोगस्य समाजप्रकृत्यादितत्त्वस्य चाध्ययनम् ।

## ४. अध्ययनविधिः

अस्मिन् अध्ययने पुस्तकालयीयानां सामग्रीणां प्रयोगो विद्यते । अभिज्ञानशाकुन्तलनाटकविषये लिखितानि पुस्तकानि, विचाराः, लेखाश्चात्र सङ्कलनं विधाय विश्लेषणं कृतमस्ति । सामग्रीणां व्याख्याविश्लेषणेऽत्र वर्णनात्मकस्य व्याख्यात्मकस्य च विधेः प्रयोगो विहितोऽस्ति ।

## ५. सीमा

अध्ययनेऽस्मिनभिज्ञानशाकुन्तलनाटके समागतानां कथावस्तूनां चरित्रादीनाञ्च समीक्षणं कृतमस्ति । तात्कालिकस्य समाजस्य प्रकृतेश्च समीक्षणं कृतमस्ति । रसध्वनिगुणालङ्कारादिविषयाणां सूक्ष्मरूपेणाध्ययनं विधातुमसमर्थताप्रकाशनमेवास्य लेखस्य सीमा वर्तते ।

## ६.पूर्वकार्यसमीक्षा

अभिज्ञानशाकुन्तलनाटकस्य विविधविषयमवलम्ब्याध्ययनमनुसन्धानं जातमस्ति । एतानि पूर्वकार्याणि क्रमिकरूपेणात्र सङ्क्षेपेण प्रस्तूयते -

**क.** आचार्य बलदेव उपाध्याय *'संस्कृत साहित्यका इतिहास'* (ई.१९९२) इति पुस्तकस्यैकादशपरिच्छेदस्य 'कालिदास' इति शीर्षकेऽभिज्ञाननाटकस्यापि चर्चा विदधाति । असावत्र नाटकमिमं कालिदासस्य सर्वश्रेष्ठं नाटकं स्वीकरोति । तथैवासौ 'काव्येषु नाटकं रम्यं तत्र रम्यं शकुन्तला' इत्युक्तिः सार्थकाऽस्तीति प्रतिपादयति । (उपाध्याय, ई.१९९२, पृ.४९८) ।

**ख.** डा.कपिलदेव द्विवेदी *'संस्कृतनिबन्धनवनीतम्'* (ई.१९९२) इति पुस्तकस्य 'कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम्' इति शीर्षकमाध्यमेन महाकवेः कालिदासस्याभिज्ञानशाकुन्तलनाटकस्य वैशिष्ट्यं प्रकटयति । नाट्यकलादृष्ट्या, काव्यसौन्दर्यदृष्ट्या, शैलीदृष्ट्या, रसपरिपाकदृष्ट्या, मनोभावादिसूक्ष्माध्ययनदृष्ट्या वा सर्वथैव शाकुन्तलस्य सर्वजनाह्लादकत्वम् इत्यसौ विवेचयति । (द्विवेदी, ई.१९९२, पृ.९८) ।

**ग.** डा.राजवंश सहाय *'संस्कृत साहित्य-कोश'* (ई.२००२) इति कोशस्य 'अभिज्ञान शाकुन्तल' इति शीर्षकेऽस्य नाटकस्य वैशिष्ट्यं प्रतिपादयति, यत् - अभिज्ञानशाकुन्तलस्य भाषा प्रवाहमयी प्रसादपूर्णा परिष्कृता परिमार्जिता सरसा च वर्तते । मूलतोऽत्र वैदर्भी रीतेः प्रयोगः प्राप्यते । अत्र दीर्घसमासयुतानां पदानामाधिक्यं नास्तीति प्रस्तौति । (राजवंश, ई.२००२, पृ.२९) ।

**घ.** कृष्णमणि त्रिपाठी *'अभिज्ञानशाकुन्तलम्'* (ई.२००६) नाटकस्य भूमिकाखण्डे 'भूमिका' इति शीर्षके महाकविकालिदासस्याभिज्ञानशाकुन्तलनाटकस्य विविधपक्षसम्बद्धं विश्लेषणं विदधाति । महाकवेः कालिदासस्य उपमालङ्कारप्रतिपादनविषयकं वैशिष्ट्यमपि प्रस्तौति। (त्रिपाठी, ई.२००६, पृ.१६) ।

**ङ.** आचार्यरामचन्द्र मिश्रः *'संस्कृतसाहित्येतिहासः'* (ई.२०१०) इति पुस्तकस्य 'नाटककाराः' इति शीर्षके कालिदासस्य विषये तस्याभिज्ञानशाकुन्तलमहाकाव्यविषये च विस्तरेणैव प्रतिपादयति । असौ संस्कृतसाहित्ये कालिदासस्य महत्तां प्रतिपादयन् गेटेमहाभागेन प्रतिपादितं 'ऐश्वर्यं यदि वाञ्छसि प्रियसखे शाकुन्तलं सेव्यताम्' सूक्तिं च
प्रकटयति । (मिश्रः, ई.२०१०, पृ.१०४) ।

**च.** डा.कपिलदेवसुवेदी *प्रौढरचनानुवादकौमुदी* (ई.२०१५) इति पुस्तके 'कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम्' इति शीर्षके कालिदासस्य नाट्यकलाकौशलं विवेचयति । अस्य काव्यसौन्दर्यं प्रेक्षं प्रेक्षं प्रशंसन्ति सहृदयाः सुधियस्तस्य कलाकौशलम् । तस्य सूक्तयः सुधासिक्ता मञ्जर्य इव चेतोहराः सन्ति । कालिदासोऽतिशेते सर्वानपि महाकवीनौपम्ये । अतः साधूच्यते - 'उपमा कालिदासस्य ।' उपमाप्रयोगे चातुर्येणैव स 'दीपशिखा-कालिदासः' इति प्रसिद्धिमाप इत्यादिनासौ कालिदासीयं काव्यवैशिष्ट्यं प्रतिपादयति (त्रिपाठी, ई.२०१५, पृ.३०८) ।

**छ.** डा.रमेशचन्द्रशुक्लः *'प्रबन्धरत्नाकरः'* (वि.सं.२०२३) इति पुस्तकस्य 'शकुन्तला' इत्युपशीर्षकेऽभिज्ञाननाटकस्य विषये विवेचनं विदधाति । असौ नाटकस्य प्रमुखं लक्ष्यं भौतिकताया आध्यात्मिकतायां सन्निवेशनं वर्तत इति प्रस्तौति (शुक्लः, ई.२०२३, पृ.२६४) ।

नाटकस्यास्य विषयमङ्गीकृत्य विविधैः समीक्षकैर्विविधेषु विषयेषु समीक्षणं कृतं दृश्यते । मूलतः समीक्षका नाटकस्यास्यालङ्काररसादिविषये केन्द्रिताः प्राप्यन्ते । तेष्वध्ययनेष्वस्मिन् नाटके

विद्यमानानां कथा-चरित्र-समाज-भाषाशैल्यादिविषये विशदं विवेचनं नैवावलोक्यते । अतो लेखोऽयं नवीनतथ्यान्वेषणे समर्थो जायते ।

**७.कालिदासस्य परिचयः**

कविकुलगुरुमहाकविकालिदासः संस्कृतसाहित्यस्यामूल्यं रत्नमस्ति । अस्य समयनिर्धारणसम्बन्धे मतभेदाः विद्यन्ते तथाप्यनेकैः प्रमाणैः ई.पू. प्रथमशतकस्य विक्रमादित्यस्यायं समकालिकः कविरिति ज्ञातुं शक्यते । कालिदासः राज्ञो विक्रमादित्यस्य सभायाः नवरत्नेष्वेकं प्रमुखरत्नमासीदिति ज्ञायते-

धन्वन्तरि-क्षपणकामरसिंह-शङ्कु-वेतालभट्ट-घट-खर्पर-कालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नवविक्रमस्य ॥

कालिदासस्य जन्मस्थानविषयेऽपि मतभेदो वर्तते । केचन काश्मिरम्, अपरे वङ्गम्, अन्ये मिथिलां च तत्तेशं कथयन्ति । परं मालवगणमुख्यविक्रमादित्यसभास्थस्य कालिदासस्य मालवमुख्यनगरी उज्जयिनी एव जन्मस्थानमिति निश्चीयते । भगवत्याः सरस्वत्याः प्रसादेन कविता-कामिन्या विलासेन कवि-कला-कौशलस्य लास्येन विश्वविख्यातवैदुष्यप्रकाशेन कालिदासेन परिचयहीनः साहित्यप्रणयी कोऽपि न । साहित्यसाधकाः सर्वेऽपि कालिदासं विदन्ति । सर्वविधप्रतिभासनाथितेन कविनानेन रघुवंश-कुमारसम्भवे महाकाव्ये, ऋतुसंहार-मेघदूते खण्डकाव्ये; मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलमिति नाटकत्रयं च विनिर्मितम् । कालिदासस्यैतानि ग्रन्थरत्नानि विश्वसाहित्येऽपि प्रसिद्धानि सन्ति । काव्यक्षेत्रे च कविराजोऽयं काव्यात्मभूते रसे विशेषतः स्वाभिरुचिं प्रकटयति । सर्वेष्वपि रसेषु सञ्चारं विदधन्नपि रसराजे शृङ्गार एव तत्राप्यसौ विप्रलम्भशृङ्गारे विशेषतः सञ्चारं विधत्ते । उपमालङ्कारस्य प्रयोगेऽसौ सिद्धहस्तः कविर्वर्तते, उक्तञ्च -

उपमा कालिदासस्य भारवेरर्थगौरवम् ।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ॥

कविकालिदासस्याद्वितीयतायाः सम्बन्धे केनापि समालोचकेनोक्तं यत् -

पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठितकालिदासः ।
अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव ॥

यद्यपि प्रसिद्धानि रससिद्धानि सर्वाण्येव छन्दांसि साधिकारतयाऽनेन प्रयुक्तानि, तदपि रसास्वाद-विशेषज्ञः समालोचक-शिरोमणिभिरस्य मन्दाक्रान्ता सविशेष स्तूयते- 'वशगा कालिदासस्य मन्दाक्रान्ता विराजते' इति । कालिदासस्य विषये नैकाः किंवदन्त्योऽपि प्राप्यन्ते । असौ पूर्वं महामूर्ख आसीत्, अनन्तरं स्वपत्न्या विद्योतमायाः प्रभावेण संस्कृतसाहित्यस्य विशिष्टो विद्वानभूदिति किंवदन्ती प्रसिद्धा वर्तते । कालिदासस्य वर्णने सङ्क्षेपो ध्वन्यात्मकता च प्राप्यते । एवमेव विषयवस्तूनां वर्णनेऽनुपमं कौशलं समीक्षते । स प्रत्येकं वस्तु सजीववत् प्रतिपादयति । अस्य संलापेषु सर्वत्र सङ्क्षेपो रम्यता चावाप्यते । असावलङ्काराणां प्रयोगेऽनुपमः पटुः । हृदयपक्षस्य चमत्कारि चित्रणं कालिदासस्य काव्येषु सर्वत्र प्राप्यते । वस्तुवर्णनावसरेऽसौ मनोरमपद्धत्या रसस्य प्राञ्जलमुपस्थापनं विधत्ते मूलतो महाकविकालिदासस्य विविधानां रचनानामाधारेणास्य वैशिष्ट्यं बिन्दुरूपेणाधःप्रस्तूयते -

- श्रव्यदृश्यकाव्यान्तर्गतानां खण्डकाव्यमहाकाव्यनाटकादीनां संरचनेऽद्वितीयं साफल्यम्
- प्रकृतिचित्रणे चातुर्यम्
- मानवीयानां भावानां सूक्ष्मतया निरीक्षणम्
- माधुर्यप्रसादगुणयोः प्रयोगाधिक्यम्
- उपमादि-विविधालङ्कारप्रयोगे तथा शृङ्गारवीरकरुणरसानां समुचितप्रयोगे नैपुण्यम्
- भाव-पदयोः कोमलतायाः संयोजनम्
- स्वभावोक्तिप्रयोगे कौशलम्
- सूक्ष्मेक्षिकया नारीसौन्दर्यस्य नारीहृदयस्य च वर्णने कौशलम्
- विविधानां हृदयहारिणां सूक्तीनां कुशलसंयोजनम्

**८.'उपमा कालिदासस्य' इति प्रसिद्धिः**

उपमालङ्कारस्य प्रयोगे कालिदासः प्रसिद्ध एव । उक्तञ्च -

उपमा कालिदासस्य भारवेरर्थगौरवम् ।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ॥

एकस्मिन् वाक्ये वस्तुद्वयस्य साधर्म्यस्य प्रतिपादनमुपमालङ्कारः । कालिदासस्योपमा प्रयोगेऽपूर्वं वैशारद्यं दृश्यते । तस्योपमासु रम्यता, यथार्थता, पूर्णता, विविधता च संलक्ष्यते, तथैवास्योपमाप्रयोगे लिङ्गसाम्यस्य औचित्यस्य च काचिदपूर्वा चारुता संलक्ष्यते । अस्य काव्येषु शतशः सन्ति उपमाप्रयोगस्थलानि । अस्य 'दीपशिखाकालिदासः' इति प्रसिद्धिरपि वर्तते । उक्तञ्च -

सञ्चारिणी दीपशिखेव रात्रौ, यं यं व्यतीयाय पतिंवरा सा ।
नरेन्द्रमार्गाट्ट इव प्रपेदे, विवर्णभावं स स भूमिपालः ॥ (रघु.६/६७)

कालिदासीया उपमाश्चतुर्धा विभाजयितुं शक्यन्ते - शास्त्रीयाः, मूर्तस्यामूर्तत्वेन साम्यम्, प्रकृतिसम्बद्धाः, विविधविषयसम्बद्धाश्च । तत्र शास्त्रीया अपि वेदव्याकरणज्योतिषदर्शनयज्ञादिविषयकाः प्राप्यन्ते, यथा - 'आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव' (रघु.१/११) । 'श्रुतेरिवार्थं स्मृतिरन्वगच्छत्' (रघु.२/२) । मूर्तस्यामूर्तरूपेण यथा - 'क्षात्रो धर्म इवाश्रितः' (रघु.१/१३), 'शुभ्रं यशो मूर्तमिवातितृष्णः' (रघु.२/६९) । एवमेव प्रकृतिसम्बद्धायामुपमायां सूर्यचन्द्रवृक्षपशुनदीपर्वतादिसम्बद्धाः प्राप्यन्ते यथा - 'सन्ध्येव शशिनं नवम्' (रघु.१/८३) । 'क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदः' (रघु.१/७३) । एवमेव विविधविषयान्तर्गतायामुपमायां देवपुरुषस्त्रीसम्बद्धा दृश्यन्ते, यथा - मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् । (मेघ.१/६६) । अनेन प्रकारेणोपमाप्रयोगे महाकविकालिदासः सर्वानपि महाकवीनतिशेते ।

**९.काव्येषु नाटकं रम्यम्**

साहित्यविधासु नाटकं सर्वातिशायि महत्त्वपूर्णं च वर्तते । यतो हि नाटकेन सहृदयजनमनसि

साहित्यस्य प्राणभूतं तत्त्वं रसं सञ्चारयति । ब्रह्मास्वादसहोदरो रसास्वादः सर्वेषामेव सहृदयानां परमाभीष्टः प्रतिभाति । मूलतः काव्यं श्रव्यदृश्यत्वभेदेन द्विविधं भवति, उक्तञ्च विश्वनाथेन- दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम् ।

दृश्यं तत्राभिनेयं स्यात् तद्रूपारोपाच्च रूपकम् ॥

यद्यपि रूपकापरपर्यायं दृश्यकाव्यं दशविध विद्यते तदपि तेषु नाटकस्य प्राधान्यम् । वस्तुतः दृश्यकाव्यमाध्यमेनैव साधारणा अपि जना नायकादिपात्रैः सह साधारणीकरणव्यापारेण वेद्यान्तरस्पर्शशून्यस्य रसस्यास्वादं सहजतयैव कुर्वन्ति । पुराकाले नाटकानां बहुलः प्रचारः जातः, वर्तमानेऽपि नाटककल्पं चलचित्रमेव सर्वाधिकप्रचारयुतं मनोरञ्जनसाधनं विद्यते । नाटके समेषां भावानां समस्तानां पदार्थानां सर्वासां कलानां सर्वेषां शास्त्राणां च संयोजनं संलक्ष्यते । तथैवात्र 'रामादिवत् प्रवर्तितव्यं न रावणादिवत्' इति काव्यप्रयोजभूतः सदुपदेशः प्राप्यते । त्रैलोक्यस्य भावजातं नाटके प्रतिबिम्बितं भवति । उक्तञ्च - 'त्रैलोक्यस्य च सर्वस्य नाट्यं भावानुकीर्तनम् ।'

संस्कृतसाहित्येऽनेकेषां कवीनां नाटकानि समुल्लसन्ति । तत्र कालिदासस्य अभिज्ञानशाकुन्तलम्, मालविकाग्निमित्रम्, विक्रमोर्वशीयञ्चेति नाटकानि प्रसिद्धानि । एवमेव विशाखदत्तस्य मुद्राराक्षसम्, भवभूतेः उत्तररामचरितम्, मालतीमाधवम्, हर्षवर्द्धनस्य रत्नावली, प्रियदर्शिका, नागानन्दञ्चेत्यादीनि नाटकानि संस्कृतसाहित्यस्य गौरववर्धकानि ग्रन्थरत्नानि । 'उत्तरे रामचरिते भवभूतिर्विशिष्यते' इति सूक्तिः भवभूतेः कारुण्यपरस्य नाटकस्य प्रशंसायां समागतं वर्तते । 'कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम्' इत्यादिना सामाजिकैः कालिदासस्य शाकुन्तलं प्रति हार्दो भावः प्रकटितः । यद्यपि सर्वाण्यपि काव्यानि हृदयाह्लाकदानि भवन्ति, तत्रापि नाटकं तु किमप्यद्वितीयं कमनीयं प्रकाशयति । अतः 'काव्येषु नाटकं रम्यम्'इति सूक्तिः सार्थका प्रतीयते ।

### १०.अभिज्ञानशाकुन्तलनाटकस्य कथासारः

#### क.प्रथमोऽङ्कः

अथ नाटकस्यादौ सूत्रधारः विघ्ननिवारणाय आशीरूपां नान्दीं पठति । ततः नटी ग्रीष्मकालमधिकृत्य गीतं गायति । मनोहारिणा तेन गीतेन मृगेण राजा दुष्यन्त इवाहमपि हठात् हतोऽस्मीति सूत्रधारः प्रस्तौति । तदनन्तरं मृगवधाय यावद् राजा दुष्यन्तो धनुषि शरं संधत्ते तावदेव द्वौ वैखानसौ 'आश्रममृगोऽयं न हन्तव्यो न हन्तव्य' इति दुष्यन्तं निवारयतः । सोऽपि तदादेशानुसारं सद्यः सायकं प्रतिसंगृहीतवान् । ततः ताभ्यां स्वात्मानुगुणं चक्रवतिनं तनयं प्राप्नुहीति शुभाशिषं प्रदाय कण्वाश्रमे प्रवेशायानुरोधं कृत्वा समिदाहरणाय प्रस्थितौ । ततो राजा रथादिकं बहिः संस्थाप्य विनीतवेषेणाश्रमं प्रविश्य तत्र सखीभ्यां समेतां शकुन्तलामालोक्य चिन्तयति -

इदं किलाव्याजमनोहरं वपुस्तपः क्षमं साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया शमील्लतां छेत्तुमृषिर्व्यवस्यति ॥

अत्रान्तरे भ्रमरपीडिता शकुन्तला आत्मानं परित्रातुं सख्यो प्रार्थितवती । सख्यश्च परिहासं कुर्वन्ति । राजरक्षितव्यानि तपोवनानि, अतोऽत्र दुष्यन्त एवागत्य त्वां परित्रास्यतीति ताः कथयन्ति । अवसरं ज्ञात्वा दुष्यन्तः आत्मानं प्रकाशयति । प्रसन्नो राजा तत्र आतिथ्यञ्च स्वीकरोति । ततः

सखीसकाशात् शकुन्तलायाः नामजन्मादिकं जानाति । एषा कुलपतेः कण्वस्य पोष्या पुत्री, अस्या माता मेनका, पिता राजर्षिविश्वामित्रोऽस्तीति परिजानाति । शकुन्तलाया रूपलावण्येनाकृष्टो राजा ब्रवीति -

मानुषीभ्यः कथं नु स्यादस्य रूपस्य संभवः ।
न प्रभातरलं ज्योतिरुदेति वसुधातलात् ॥

इदं श्रुत्वा शकुन्तलाऽधोमुखी तिष्ठति । क्षत्रीयकन्या शकुन्तला अस्मद्विवाहयोग्या इति राजा निःशङ्को दृश्यते । शकुन्तलापि राजानं प्रत्याकृष्टा जायते । अनन्तरमेव कस्यचिद्वन्यगजस्य तपोवनप्रवेशं श्रुत्वा संभ्रान्ता शकुन्तलाया सख्यः मुनिकुमार्यः उत्तिष्ठन्ति । शकुन्तला राजानमवलोकयन्ती सव्याजं विलम्ब्य निर्गच्छति । शकुन्तलां प्रत्याकृष्टो राजा स्वकीयं नगरं गन्तुं नेच्छति, असौ तत्रैव भ्रमति ।

**ख.द्वितीयोऽङ्कः**

अयं मृगः, असौ शार्दूल इति मध्याह्नेऽपि अटवीतोऽटवीं भ्रममाणस्य राज्ञो दुष्यन्तस्य स्नेहपरवशेन माधव्यनाम्ना विदूषकेन दुःखानुभवो वर्णितः । ततो मृगवाराहादीननुसरता कण्वाश्रमप्रविष्टेन नृपेण दुष्यन्तेन तपस्विदुहिता शकुन्तलावलोकिता । तस्याः लावण्ये लुब्धो राजा तामेवानिशं चिन्तयन् कथमपि निशामतिवाहितवान् । ततो राजा सेनापतिमाहूय प्रोवाच सेनापते ! वनग्राहिणो निवर्तस्व यथा तपोवनोपरोधो न भवेत्तथा सैनिकाः निरोधव्याः । यतो हि -

शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः।
स्पर्शानुकूला इव चन्द्रकान्तास्तदन्यतेजोऽभिभवाद्वमन्ति ॥

ततो दुष्यन्तः रहसि स्वसुहृदे माधव्याय कण्वसुताशकुन्तलादर्शनेन जातामात्मनोऽवस्थां न्यवेदयत् । शकुन्तलाया देवाङ्गनासंभवत्वम्, आत्मनस्तया सह सम्बन्धयोग्यतां च सकलं विषयमवर्णयत् । तस्मिन्नेवावसरे मुनिकुमारौ तत्रागत्योचतुः - राजन् ! भवानत्रैव तिष्ठतु । तपस्विनो भवन्तं प्रार्थयन्ते यदस्माभिः क्रियमाणे याज्ञे राक्षसा बाधां कुर्वन्ति, ततः तन्निवारणाय भवता कतिपयदिवसमात्रम् आश्रमोऽयं सनाथीक्रियताम् । तस्मिन्नेवान्तरे राजधानीतोऽम्बाया सन्देशहरः करभकः समागत्य दुष्यन्ताय सन्देशं निवेदयति । स राजधानीं प्रत्यावर्तयितुं मातुः सन्देशं श्रावयति । ततः समकालं तपस्विसहितशकुन्तलानुराग-पुत्रकर्तव्याभ्यामाकुलीकृतचित्तः दुष्यन्तो विदूषकमाह - "वयस्य ! त्वं तत्र गत्वा तत्पुत्रकार्यं सम्पादय, अहं तु ऋषीणां गौरवादत्रैव तिष्ठामि । न खलु त्वया शकुन्तलायां ममाभिलाषः तत्र प्रकटनीयः ।" एवमाभाष्य राजा सकलानुयात्रिकैः सह विदूषकं स्वराजधान्यां विसृज्य कण्वाश्रमे प्रविष्टः ।

**ग.तृतीयोऽङ्कः**

अथ कुशहस्तो यजमानशिष्यः प्रविश्य राज्ञो दुष्यन्तस्य तपोवनप्रवेशात् निखिलं यज्ञकर्म संवृत्तमिति तस्य शौर्यं वर्णयति । ततो मुनिभिरनुज्ञातो दुष्यन्तः श्रमं दूरीकरणाय मनोविनोदाय च मालिनीनद्याः तीरे विद्यमानं वेतसलतामण्डपं प्रति गच्छति । स्थानमेतत् शकुन्तलायाः कृते प्रियमस्ति । यत्र शकुन्तला स्वप्रियसखिभ्यामनसूयाप्रियम्बदाभ्यां सह पूर्वमेव प्रापिता आसीत् । मदनातुरायाः शकुन्तलायाः सखीभ्यां सह विश्रम्मालापांश्च संश्रोतुकामो नृपः शाखान्तरितो भूत्वाऽतिष्ठत् । ततः सखीभ्यां तदवस्थां ज्ञातुं पृष्टा सा ब्रवीति - "सख्यौ तपोवनेऽस्मिन् राजर्षेः दुष्यन्तस्यागमनादेवाहमिमां

दशां गतास्मि । स एव मम शरणम् ।" एतत्श्रुत्वा सन्तुष्टान्तरात्मा दुष्यन्तः तमेवावसरं प्रकटयितुं मत्वा सहसोपसृत्य स्वीयां चानिवर्णनीयां दशां ताः प्रख्यापयति । ततः सख्यौ कथयतः - "महाभाग ! एषा प्रियसखी शकुन्तला भवन्तमेवोदिश्य मदनेनेदं दशान्तरं नीता ।" तदनु सख्यौ मृगपोतकं तन्मात्रा सह मेलयितुं व्याजीकृत्य लतामण्डपाद् बहिर्गच्छतः । अथ सख्योरनुसरणपरां शकुन्तलां राजा बलान्निवारयति । ततः किश्चित्कालं चिरप्रार्थितवाञ्छासाफल्येन तौ परमानन्दमनुभवतः । तत्र शान्त्युदकहस्ता गौतमी शकुन्तलामाह्वयन्ती समागच्छति, कथयति च - 'वत्से ! अनेन दर्भोदकेन ते शरीरं निर्बाधं भविष्यति ।' ततः सायंकाले प्रवृत्ते सर्वा उटजं प्रति गच्छन्ति । शकुन्तला लतावलयव्याजेन सन्तापहारकं राजानं पुनः परिभोगाय सङ्केतयति । अतिखिन्नमना राजा प्रियापरिभुक्तमुक्ते लतामण्डपे मुहूर्तं स्थित्वा ऋषीणां निशाचरभयवारणाय निर्गच्छति । तदनु दुष्यन्तो गान्धर्वविवाहविधिना शकुन्तलां विवाह्य तया साकं किञ्चित्कालमतिबाह्य ऋषिभिरनुज्ञातः स्वां राजधानीं गन्तुमिच्छति । ततः तस्यै स्वनामाङ्कितमङ्गुलीयकं प्रदाय किञ्चित्कालानन्तरं ममान्तः पुरप्रापकः कश्चन विश्वस्तो जनः तव समीपमुपैष्यतीति समाश्वास्य राजा हस्तिनापुरं प्रचलति ।

**घ.चतुर्थोऽङ्कः**

राजानं दुष्यन्तं ध्यायन्ती शकुन्तला खिन्नमना उटजसन्निधावेव तिष्ठति । राजा कदा दूतं प्रेषयिष्यतीति प्रतिक्षायां शकुन्तला चिन्तिता संलक्ष्यते । तदा महर्षिदुर्वासा भिक्षार्थं तत्र समागच्छति परं स्वप्रियस्य चिन्तने निमग्ना शकुन्तला तं न पश्यति । दुर्वासा तां प्रति क्रुध्यति, तदनु द्वारदेशे समुपस्थितं मां तपोधनं न वेत्सीत्यतो बोधितोऽपि स ते प्रियः विवाहवृत्तं न स्मरिष्यतीति शप्त्वा दुर्वासा निर्गच्छति । उक्तञ्च -

विचिन्तयन्ती यमनन्यमानसा तपोधनं वेत्सि न मामुपस्थितम् ।
स्मरिष्यति त्वां न स बोधितोऽपि सन् कथां प्रमत्तः प्रथमां कृतामिव ॥

श्रापं निशम्य चिन्तिता अनसूया मुनिप्रसादनाय प्रियम्बदां निर्दिशति । सा मुनिचरणयोः प्रणिपतति । मम शापोऽन्यथा न भावी, किन्त्वभिज्ञानाभरणदर्शनेन स शापो निवर्तयिष्यत इत्युक्त्वा मुनिरन्तर्हितो जायते । सोमतीर्थयात्रातः प्रतिनिवृत्तेन महर्षिणा कण्वेनाग्निगृहे प्रवेशे व्योमवाचा शकुन्तलाया दुष्यन्तेन साकं संवृत्तं गान्धर्वविवाहमवगच्छति । प्रसन्नः कण्वः शकुन्तलां पतिगृहं प्रेषयितुकामः तदीयप्रस्थानमङ्गलविधिमादिशति च । सा गौतम्यादिभिः तापसीभिराशीर्वचनं गृह्णाति । पतिगृहं समुपस्थाय मर्यादापालनपूर्वकं पति-सपत्नी-श्वसुर-श्वश्रु-परिजनादीनां सन्तोषकरकार्यं विधातुं कण्वः शकुन्तलामुपदिशति । ततः शकुन्तला तातानुरोधेन हुताग्नीन् प्रदक्षिणीकृत्य वनदेवताश्च प्रणम्य विभिन्नैर्वृक्षादिभिर्दत्तानि दिव्यानि आभरणवस्त्रादीनि परिधाय वयस्याभ्यां चानुगम्यमाना प्रस्थानं करोति । सख्यावपि प्रियम्बदानसूये- प्रियसखि ! शकुन्तले ! यदि स राजा प्रत्यभिज्ञानमन्थरो भवेत्तदा नगरगमनसमये तुभ्यमर्पितं तदङ्गुलीयकं तस्मै दर्शयितव्यमिति कथयतः । ततो गौतमी-शाङ्र्गरवशारद्वतैः सह शकुन्तला हस्तिनापुरं निर्गच्छति, कण्वश्च प्रियम्वदानसूयाभ्यां साकं शकुन्तलाशून्यं स्वाश्रमं प्रत्यागच्छति ।

**ङ.पञ्चमोऽङ्कः**

वयस्येन माधव्येन सह राजा दुष्यन्तः राजधान्यां लयतालवद्धं गीतं निशम्य कामप्यन्तर्व्यथामनुभवति । अत्रैवान्तरे कुलपतेः कण्वस्यादेशमादाय तपोवनात् सस्त्रीकाः तपस्विनः समायाता इति कञ्चुकी निवेदयति । ततः पुरोहितो राजाज्ञया श्रौतेन विधिना तान् सत्कृत्य यज्ञशालायामुपस्थापयति । तत्र प्रविष्टास्ते आशीर्वचनपूर्वकं राज्ञे शकुन्तलाविषयकं सन्देशं निवेदयन्ति । परं महर्षेः दुर्वाससः शापप्रभावेण स शकुन्तलायाः परिणयविधिं न स्मरति । शकुन्तलाया अवगुण्ठनापनयनानन्तरं प्रत्यक्षीकृत्यापि राजा न परिजानाति । अभिज्ञानेन राज्ञः शङ्कामपनेतुं शकुन्तला प्रयत्नं करोति परमङ्गुलीयकशून्यामङ्गुलीं दृष्ट्वा सा विषण्णा भवति । साऽऽश्रमे राज्ञा सह व्यतीताः घटनाश्च श्रावयति, तथापि राजा न स्मरति । पापबुद्धिं परिज्यज, छलकपटादिकं मा कुरु इत्यादिकथनेन राजा शकुन्तलां प्रति भर्त्सनं विदधाति । शकुन्तला पटान्तरेण मुखमाच्छाद्य रोदिति । आस्माभिः गुरोर्नियोगोऽनुष्ठितः, इयं ते पत्नी त्यजेनां गृहाण वा इति राजानमुक्त्वा गौतमी-शाङ्गरव-शारद्वताश्च प्रत्यागच्छन्ति । राजा पुरोहितेन सह समयोचितं कर्तव्यं पृच्छति । आप्रसवं शकुन्तला मम गेहे एव तिष्ठतु । यदि सा चक्रवर्तिनं पुत्रं जनयिष्यति चेत्तदा इमामन्तःपुरे प्रवेशयिष्यसि, अन्यथैषाऽस्याः पितुः समीपे गमिष्यतीति पुरोहितः प्रोक्तवान् । राजा तदेव विधातुमनुमतिं प्रयच्छति । ततः पुरोहितमनुगच्छन्तीं रुदन्तीं शकुन्तलां स्त्रीसदृशाकारदिव्यज्योतिः आकाशात् समागत्य तां समुत्थाय नयति । आश्चर्यान्वितः पुरोहितो घटनामिमां राज्ञे निवेदयति । घटनयाऽनया शयनागारप्रविष्टो राजा चिन्तितो दृश्यते ।

**च.षष्ठोऽङ्कः**

किञ्चित्काले व्यतीते कश्चिद् धीवरः रत्नजटितं राजनामोत्कीर्णं बहुमूल्यमेकं स्वर्णमयमङ्गुलीयकं विक्रतुमापणे गच्छन् आसीत् । स धीवरः राजपुरुषाभ्यां बद्धहस्तो राजसमीपं प्रापितः । अङ्गुलीयकागमनकारणं पृष्टः स कथयति - “स्वामिन् ! एकदा मया जाले एको रोहितो मत्स्य आसादितः। खण्डशः कल्पितस्य तस्योदरे रत्नभास्वरमिदमगुलीयकं मया लब्धम् । ततः विक्रेतुमापणे आगतः, आभ्यां गृहीतः ।” तदाकर्ण्य तदङ्गुलीयकं दृष्ट्वा दुर्वासाशापस्यान्तो जायते, राज्ञो मनसि शकुन्तलायाः स्मृतिः समागच्छति । तदनु प्रसन्नो राजा तस्मै धीवरायाऽङ्गुलीयकमूल्यसम्मितं स्वर्णकङ्कणं प्रयच्छति । तदनु शकुन्तलापरित्यागस्य घटनया राजा चिन्तितो भवति । चिन्तामपनेतुं राजा विदूषकेण सह वसन्तोत्सवाय प्रमदवनं गच्छति । अथ मेनकासहचरी सानुमती नामाप्सरा राज्ञो दुष्यन्तस्य प्रमदवने प्रविष्टा प्रतिच्छन्ना राज्ञः पार्श्ववर्तिनी भूत्वा तिष्ठति । अङ्गुलीयकदर्शनेन स्मृतशकुन्तलो राजा क्वापि शान्तिं न प्राप्नोति । स शकुन्तलायाः चित्रलेखनादिना तद्विषयकालापैश्च कथं कथमपि दिवसान् नयति । धर्मासनमध्यासितुमसमर्थो राजा नगरकार्यनिरीक्षकं मन्त्रिणं राजकार्यसम्बद्धं वृत्तान्तं लिखित्वा प्रेषयितुं निर्दिशति । ततः स मन्त्री सन्तानहीनस्य धनमित्रनामकस्य व्यापारिणो नौकादुर्घटनया जातां मृत्योर्घटनां पत्रमाध्यमेन राजानं प्रेषयति । सन्तानहीनस्य तस्य वृत्तान्तं श्रुत्वा राजा दुःखितो जायते । स्वस्य पुरुवंशविच्छेदस्याशङ्कया व्याकुलो भवति । शकुन्तलया सह पुनर्मिलनस्य समाचारं श्रावयितु मेनकया प्रेषिता सानुमती तत्र प्राप्नोति । अत्रान्तरे केनाप्याक्रान्तो विदूषकः स्वरक्षार्थं राजानमाह्वयति । राजा स्ववयस्यस्य संरक्षणाय स्वधनुषि

बाणसन्धानं करोति । तदा विदूषकमुन्मुच्येन्द्रसारथिर्मातलिराविर्भूय इन्द्रस्य शत्रुं दुर्जयनामकं राक्षसं मारयितुं दुष्यन्तं प्रति इन्द्रेण प्रेषितं सन्देशं श्रावयति । तदनु राजा स्वगमनवृत्तान्तममात्याय निवेदयितुं विदूषकमादिश्य वासवीयं रथमारुह्य दिवं प्रस्थितवान् ।

**छ.सप्तमोऽङ्कः**

दुर्जयदानवगणं निहत्य देवकार्यसम्पादनानन्तरं राजा दुष्यन्तो व्योमयानेनावतरद् मातलिपरिचायितां देवभूमिमवलोकयति । तत्र मार्गे हेमकूटं पर्वतं दृष्ट्वा तत्र तपश्चरतः सपत्नीकस्य कश्यपस्य दर्शनलालसया राजा तदाश्रममवतरति । तत्र कश्यपः महर्षिपत्नीभिः सहितायै स्वपत्न्यै अदित्यै पतिधर्ममधिकृत्य उपदिशतीति ज्ञात्वाऽशोकवृक्षमूले राजा समुपविशति । तत्रैको बालः सिंहशाबकेन सह क्रीडन्तो दृश्यते । बालं दृष्ट्वा राजा पुत्रवात्सल्येन मोहितो भवति । बालहस्ते चक्रवर्तिनो राज्ञो लक्षणं दृष्ट्वा राजा प्रसन्नो भवति । राजा बालमेनं स्वकीये क्रोडे निधाय तस्य स्पर्शसुखमनुभवति । द्वयोर्वदनयोः साम्यं निरीक्ष्यैका तापसी आश्चर्यचकिता जायते । यदा बालकस्य मणिबन्धात् परिभ्रष्टं रक्षाकरण्डकं दुष्यन्तो यावद् गृह्णाति, तावत्तापसी निवेदयते -"एषा अपराजिता नामौषधिरस्य शिशोः जातकर्मसमये भगवता कश्यपेन बद्धा । यदि जननी जनकं बालकं वा विहायान्यः कश्चिद्, भूमिपतितामेनां गृह्णाति तदा सर्पो भूत्वा तं दशतीत्यनेकशो दृष्टचरम् ।" ततः स्वपुत्र एवायमिति राजा निश्चयं करोति । ततस्तापसीभ्यां तदुदन्तमुपलभ्य तत्रागतां शकुन्तलां समीक्ष्य राजा तामभिननन्द । राजा शकुन्तलासमक्षं क्षमां याचते । मोहात्स्वयमुपस्थितापि मया उपेक्षिता इति पश्चात्तापदूनहृदयो नृपो तस्य तदङ्गुलीयकं दर्शयति । अनन्तरं सकलत्रपुत्रो राजा भगवन्तं कश्यपमदितिं च द्रष्टुमुपस्थितः । ततो महर्षिः कश्यपोऽपि स्नेहदृष्ट्या शुभाशिषा संयोजयति । मेनकापि तत्र भर्तृपुत्रसहितां दुहितरं दृष्ट्वाऽतिमुमुदे । ततो दुष्यन्तो पुत्रकलत्राभ्यां सहितो दिव्यमैन्द्रं रथमारुह्य पौरैरभिनन्द्यमानं स्वं नगरं प्रविशति ।

## ११. चरित्रचित्रणम्

अभिज्ञानशाकुन्तलनाटके नैकानां पुरुषचरित्राणां स्त्रीचरित्राणाञ्च प्रयोगो विद्यते । तत्र पुरुषचरितेषु दुष्यन्त-विदूषक-सूत्रधार-सूत-वैखानस-कण्व-शाङ्र्गरव-शारद्वतप्रभृतीनि चरित्राणि सन्ति । तथैवात्र स्त्रीचरितेषु शकुन्तला-नटी-अनसूया-प्रियम्वदा-प्रतिहारी-गौतमी-तापसीप्रभृतीनि चरित्राणि विद्यन्ते । अत्र नाटकनायकस्य दुष्यन्तस्य नायिकायाः शकुन्तलायाश्च चरित्रचित्रणं विधीयते ।

**क.दुष्यन्तः**

राजा दुष्यन्तोऽभिज्ञानशाकुन्तलनाटकस्य नायकोऽस्ति । चन्द्रवंशीयः क्षत्रीयोऽसौ धीरोदात्तगुणान्वितो वर्तते । शरीरेणाप्यसौ राजा आकर्षको विद्यते । अस्य व्यक्तित्वेन सर्वेऽपि प्रभाविता जायन्ते । असौ पराक्रमशीलो धार्मिकश्चास्ति । अस्य पराक्रमस्य प्रसिद्ध्या देवराजेन्द्रोऽपि साहाय्यप्रदानेऽमुमाह्वयति । असौ कोमलहृदययुतो मधुरभाषी वर्तते । राजासौ स्वकुलस्य प्रतिष्ठां विचार्य सत्कार्यं विदधाति । मृगयार्थं वनं गतो राजा कण्वाश्रमे शकुन्तलायाः सौन्दर्येण मुग्धो जायते । प्रियंवदापि राज्ञो गभीराकृतेर्मधुराया वाण्याश्च -'दुरवगाहगभीराकृतिर्मधुरमालापनप्रभुतवदाक्षिण्यं विस्तारयति' इत्यादिना प्रशंसनं करोति । असौ स्वकीया पराक्रमशक्तिः तपोवनस्य संरक्षणार्थं योजयति । राजा वर्णाश्रमधर्मस्य रक्षामेव स्वकर्तव्यं स्वीकरोति । 'राजन् आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः'

इति वाणी श्रुत्वैवासौ स्वबाणान् नियन्त्रयति । अपूर्वलावण्यवतीं शकुन्तलां दृष्ट्वाऽसौ आकृष्टो वर्तते पर तां प्रति प्रणयप्रदर्शनात् पूर्वमेयं विवाहयोग्याऽस्ति न वेति विचारयति -'असंशयं क्षत्रपरिग्रहक्षमा' इत्यादिना । शकुन्तलां प्रति तिरस्कारं विदधन्तममुं शाङ्र्गरवः कटुकोक्तिभिः प्रहरति परं स तत्सर्वं सह्य आत्मसंयमस्य परिचयं प्रस्तौति । असौ चित्रकलायामपि निपुणो विद्यते । स्वेनैव परिणीतां पत्नीं शकुन्तलापरित्यागेनास्य चरित्रं पतितमस्ति, परं दुर्वासाशापकारणेन स्मृतिभ्रंशादयं निष्कलङ्कः प्रतीयते । कुशले शासकेऽस्मिन् कर्तव्यपरायणता, प्रजाप्रेम, लोभरहितता चेत्यादीनि वैशिष्ट्यानि प्राप्यन्ते ।

**क.शकुन्तला**

शकुन्तलाऽभिज्ञानशाकुन्तलनाटकस्य नायिका वर्तते । एषा राजर्षिविश्वामित्रमाध्यमेन मेनकायाः गर्भत जाता, ऋषिणा कण्वेन पालिता परमा सुन्दरी विद्यते । आश्रमे राज्ञा दुष्यन्तेन सहास्या गान्धर्वविधिना विवाहो जायते । दुष्यन्तस्यानुसारेणेयमव्याजमनोहरवपुयुतापूर्वसौन्दर्ययुता च वर्तते -

मानुषीभ्यः कथं नु स्यादस्य रूपस्य संभवः ।
न प्रभातरलं ज्योतिरुदेति वसुधातलात् ॥

प्रकृतेः सुरम्यक्रोडे पालितायाः शकुन्तलायाः हृदये लतावृक्षादिष्वपूर्वः स्नेहो वर्तते । मृगशाबकान् प्रत्यपि साऽधिकं स्नेहं प्रदर्शयति । इयमतिसरला कोमला मुग्धा नायिका वर्तते । शकुन्तलाया दुष्यन्तेन सह गान्धर्वविधिना कृतो विवाहः, गर्भधारणं च कतिपयानामालोचकानां दृष्टौ चारित्रिकं स्खलनमस्ति परं कविना तस्याः विवाहे सख्योरपि सहभागितां प्रदर्श्य चरित्रस्य संरक्षणं कृतं वर्तते । अस्याः हृदि दुष्यन्तं प्रत्यधिका श्रद्धा दृश्यते । शकुन्तला हिन्दूनारीणामादर्शचरितयुताऽस्ति । इयं राज्ञा तिरस्कृतापि अविचलिता धीरा च संलक्ष्यते । कविना विहितेन चित्रणानुसारेण शकुन्तला त्रिविधस्वरूपयुता दृश्यते, तत्र प्रथमं सा कामातुरा युवती, अनन्तरं सा पत्या तिरस्कृता पीडिता नारी, ततः साऽपूर्वा क्षमादात्री च विलोक्यते । इयं हिन्दूसंस्कारानुसारेण कुशला गृहिणी अपि वर्तते ।

**१२. रसप्रयोगः**

अभिज्ञानशाकुन्तलनाटकेऽङ्गीरसरूपेण शृङ्गाररसो वर्तते । अत्र विप्रलम्भशृङ्गार-वीराद्भुत-करुण-हास्य-भयानक-रौद्र-वत्सलप्रभृतयोऽङ्गरसरूपेण समागता दृश्यन्ते । अत्र विविधानां सञ्चारीभावानामपि प्रयोगोऽवलोक्यते । विप्रलम्भशृङ्गारस्य सन्दर्भोऽप्यत्र प्राचुर्येण वर्तते परं प्रारम्भेऽन्ते च नायकनायिकयोः सुखदसम्मेलनेन सम्भोगशृङ्गारस्य प्राबल्यमवलोक्यते । तत्र मृगयासमये मृगे भयस्य, नृपे दुष्यन्ते च वीरस्य प्रसङ्गो वर्तते । द्वितीयेऽङ्के हास्यरसस्य प्रयोगाधिक्यमनुभूयते । तृतीये विप्रलम्भस्य चतुर्थे करुणस्य च प्राधान्यमस्ति । पञ्चमे हास्य-वीर-शान्तरसस्य च संयोजनं प्राप्यते । षष्ठेऽङ्के राज्ञो विरहवेदनाया वर्णनप्रसङ्गात् विप्रलम्भशृङ्गार एव वर्तते, आश्रमे राज्ञः सर्वदमनस्य वर्णनसन्दर्भे वात्सल्यरसोऽप्यनुभूयते, तथैव सप्तमेऽङ्के दुष्यन्तशकुन्तलयोः सम्मेलनात् सम्भोगशृङ्गारो व्यज्यते ।

**१३. प्रकृतिचित्रणम्**

प्रकृतिचित्रणे महाकविकालिदासः कुशलो वर्तते । अस्याधिकासु कवितासु प्रकृतीनां कलात्मकं चित्रणं प्राप्यते । अभिज्ञानशाकुन्तलनाटकेऽपि प्रकृतेः स्वाभाविकं चित्रणं कृतमस्ति ।

स्वभावोक्त्यलङ्कारमाध्यमेन प्रकृतिचित्रणेऽसौ सिद्धहस्तो विलोक्यते । कविनात्र आश्रम-वनकुञ्ज-नदी-पर्वतोपवनादीनां मनोरमं वर्णनं विदधाति । कविना विहितं कण्वस्याश्रमक्षेत्रस्य वर्णनं यथा -

नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरूणामधः
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः ।
विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा-
स्तोयाधारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किताः ॥

## १४. समाजचित्रणम्

अभिज्ञानशाकुन्तलनाटके कालिदासकालीनस्य समाजस्य चित्रणं प्राप्यते । तत्रापि वैदिकवर्णव्यवस्थया व्यवस्थितः समाज आसीदिति ज्ञायते । शाकुन्तले ऋषिः कण्वः यज्ञकर्मणि संलग्नः प्रतीयते । वने विक्षिप्ता शकुन्तला तेन प्राप्ता, मुनेः दयार्द्रचेतः शकुन्तलां परिपालनाय प्रेरयति । एवमेव क्षत्रियस्य क्षत्रियत्वं तु नाटकस्यास्य पदे पदे संलक्ष्यते । तापसोऽप्यत्र राजानं क्षत्रियधर्मं स्मारयति । 'आर्तत्राणाय वः शस्त्रं न प्रहर्तुमनागसि' इति वाक्येन सुप्तक्षात्रधर्मं बोधयति । तदा स्वस्ववर्णेष्वेव विवाहं भवति स्म इत्यपि नाटके ध्वनितमस्ति । तदा वर्णक्रमं विहाय विवाह कलङ्कयुतो भवति स्म इति ज्ञायते । वैश्यस्यापि शाकुन्तले महती चर्चा वर्तते । तदा ते जलपथोजीविनः आसन् । धनार्जनमेव तेषां मुख्यं कर्म आसीत् । सन्तानाभावे जनस्य धनं राज्ञः कोशे गच्छति स्म इत्यपि तत्र दृश्यते । दानग्रहणमपि ब्राह्मणस्य कर्म इति तत्र सङ्केतितमस्ति । तदा यत्र कुत्रापि आश्रमा आसन्निति नाटकादवज्ञायते । तदा मृगयार्थं राजानः ससैन्यं वनं गच्छन्ति स्म, समाजे दुर्जनैःसह युद्धमपि भवति स्म चेत्यादयः तात्कालिकाः सामाजिका विषया नाटकस्यास्याध्ययनेनावगम्यते ।

## १५. भाषाशैली

अभिज्ञानशाकुन्तलनाटकस्य भाषा सरसा, प्रवाहमयी, प्रसादपूर्णा, परिष्कृता, परिमार्जिता च वर्तते । अत्र मूलतो वैदर्भीरीतेः प्रयोगः संलक्ष्यते । अत्र दीर्घसमासयुतानां पदानां बाहुल्यं नैवावलोक्यते । कविनात्र स्वल्पैः शब्दैरपि गभीराणां भावानां प्रकाशनं कृतमस्ति । कविना पात्रानुकूलानां भाषाणां प्रयोगेन नाटकं व्यावहारिकं विहितं दृश्यते । नाटके संस्कृतभाषायाः शौरसेनीप्राकृतभाषायाश्च प्रयोगो विद्यते । नाटके कोमलानां भावानां मनोरमं चित्रणं प्रस्तुतमस्ति । विविधानां सूक्तीनां प्रयोगेनाप्यस्य भाषा कलात्मिकी संलक्ष्यते । छन्दःसंयोजनेऽप्यत्र सुकुमाराणां मृदुलानां पदावलीनां संयोजनं प्राप्यते । अत्र प्रकृतीनां वर्णने मनोहारी शैली समवलोक्यते । अत्र पात्रानुकूलैः स्वल्पैः संवादैरपि नाटकमभिनेयात्मकं जातमस्ति ।

## १६. निष्कर्षः

लेखेऽस्मिन् समागताः सारविषया बिन्दुरूपेणात्र प्रस्तूयन्ते :

- महाकविकालिदासविरचितस्याभिज्ञानशाकुन्तलनाटकस्योपजीव्यग्रन्थत्वेन महाभारतस्यादिपर्ववर्णितं शकुन्तलोपाख्यानं प्रसिद्धम्,

- सप्तमसङ्ख्यकेषु विभक्तेऽस्मिन् नाटके राज्ञो दुष्यन्तस्य शकुन्तलायाश्च परस्परप्रणय-मिलन-विरहसन्दर्भाणां विषयाः प्रतिपादिताः,
- नाटकस्यास्य नायको राजा दुष्यन्तः, नायिका च शकुन्तला,
- पौरस्त्यनाट्यसिद्धान्तमवलम्ब्य संरचितमिदं नाटकमभिनयदृष्ट्यापि सुकरम्,
- अत्र सम्भोगशृङ्गाररसः प्राधान्येन प्रतिपादितः, असंलक्ष्यक्रमव्यङ्ग्यध्वनिश्च व्यञ्जितः,
- नाटके चतुर्विंशतिसङ्ख्यकानां छन्दसां प्रयोगः, प्रसादगुणस्य वैदर्भी रीतेश्च प्रयोगः,
- अत्र विविधशब्दार्थालङ्काराणां प्रयोगो विद्यमानेऽप्युपमालङ्कारस्याधिकप्रयोगः,
- सूक्तिसौन्दर्येण नाटकं रुचिकरं मनोरमं च,
- गेटेसदृशैः पाश्चात्यकविभिरपि नाटकस्याधिकं प्रशंसनम्,
- अत्र सुन्दरं प्रकृतिचित्रणम्, मनोहारी भाषाशैली च प्रयुक्ता ।

**सन्दर्भग्रन्थसूची**


आचार्यः, रामचन्द्र मिश्रः (ई.२०१०) *संस्कृतसाहित्येतिहासः* वाराणसी : चौखम्बाविद्याभवनम् ।

कालिदासः (ई.२०१०), *अभिज्ञानशाकुन्तलम्,* नवकिशोरकरशास्त्री (संस्कृतव्याख्या), वाराणसी : चौखम्बा अमरभारती प्रकाशनम् ।

द्विवेदी, कपिलदेवः (ई.१९९२) *संस्कृतनिबन्धशतकम्* (पञ्चमसं.), वाराणसी : विश्वविद्यालय प्रकाशनम्।

राजवंशः सहायः (ई.२००२), *संस्कृत साहित्य-कोश* (चतुर्थ सं.), वाराणसी : चौखम्बा विद्याभवनम् ।

रुय्यकः, (ई.२००१) *अलङ्कारसर्वस्वम्,* वाराणसी : चौखम्बा सुरभारती प्रकाशनम् ।

वामनः (ई.२०१०), *काव्यालङ्कारसूत्रवृत्तिः,* (चतुर्थ सं.), (व्याख्याता-पं.केदारनाथ शर्मा), वाराणसी : चौखम्बा कृष्णदास अकादमी ।

विश्वनाथः, (ई.१९९५), *साहित्यदर्पणः* (पञ्चम सं.), वाराणसी : कृष्णदास अकादमी ।

शुक्लः, रमेशचन्द्रः (वि.सं.२०२३), *प्रबन्धरत्नाकरः,* वाराणसी : चौखम्बा विद्याभवनम् ।

सुवेदी, कपिलदेवः, (ई.२०१५),*प्रौढरचनानुवादकौमुदी* (२२संस्क.), वाराणसी : विश्वविद्यालय प्रकाशनम् ।